श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके द्वादशः प्रश्नः ॥

## (काठकम् - ३)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके द्वादशः प्रश्नः ॥
## (काठकम्॒ - ३)

॥हरिः ओ(४)म्॒॥

तुभ्यं॒ ता अ॑ङ्गिरस्तमा॒श्याम॒ तं काम॑मग्ने।
आशा॑नां त्वा॒ विश्वा॒ आशाः᳚।
अनु॑ नो॒ऽद्यानु॑मति॒रन्विद॑नुमते॒ त्वम्।
कामो॑ भू॒तस्य॒ काम॒स्तदग्रे᳚।
ब्रह्म॑ जज्ञा॒नं पि॒ता वि॒राजा᳚म्।
य॒ज्ञो रा॒यो॑ऽयं य॒ज्ञः।
आपो॑ भ॒द्रा आदित्प॑श्यामि।
तुभ्यं॑ भरन्ति॒ यो दे॒ह्यः।
पूर्वं॑ देवा॒ अप॑रेण प्राणापा॒नौ।
ह॒व्य॒वाह॒ग्ग्॒ स्विष्टम्॥ 1 ॥

तुभ्यं॒ दश॑॥ 1 ॥

दे॒वेभ्यो॒ वै स्व॒र्गो लो॒कस्ति॒रो॑ऽभवत्।
ते प्र॒जाप॑तिमब्रुवन्।
प्रजा॑पते स्व॒र्गो वै नो॑ लो॒कस्ति॒रो॑ऽभूत्।

Please let us know of any errors in this text.

sunder kidambi
prapatti dot com
sunder kidambi

तमन्वि॒च्छेति॑।
तं य॑ज्ञक्र॒तुभि॒रन्वै᳚च्छत्।
तं य॑ज्ञक्र॒तुभि॒र्नान्व॑विन्दत्।
तमिष्टि॑भि॒रन्वै᳚च्छत्।
तमिष्टि॑भि॒रन्व॑विन्दत्।
तदिष्टी॑नामिष्टि॒त्वम्।
एष्ट॑यो ह॒ वै नाम॑।
ता इष्ट॑य॒ इत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः॥ **2**॥

तमाशा᳚ऽब्रवीत्।
प्रजा॑पत आ॒शया॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वा आशा᳚ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्याऽऽशा॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य
पु॒रो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
आ॒शायै॑ च॒रुम्।
अनु॑मत्यै च॒रुम्।
ततो॒ वै तस्य॑ स॒त्याऽऽशा॑ऽभवत्।

sunder kidāmbi prapatti dot com sunder kidāmbi

अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्या ह॒ वा अ॒स्याशा॑ भवति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ऽऽशायै॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚
स्वि॒ष्ट॒कृते॒ स्वाहेति॑॥ 3॥

तं कामो᳚ऽब्रवीत्।
प्रजा॑पते॒ कामे॑न॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै कामो᳚ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यः कामो॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य
पुरो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।
कामा॑य च॒रुम्।
अनु॑मत्यै च॒रुम्।

ततो॒ वै तस्य॑ स॒त्यः कामो॑ऽभवत्।

अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।

स॒त्यो ह॒ वा अ॑स्य॒ कामो॑ भवति।

अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚।

अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।

स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚

स्वि॒ष्ट॒कृते॒ स्वाहेति॑॥ 4॥

तं॑ ब्रह्मा᳚ब्रवीत्।

प्रजा॑पते॒ ब्रह्म॑णा॒ वै श्रा᳚म्यसि।

अ॒हमु॒ वै ब्रह्मा᳚स्मि।

मां॑ नु य॑जस्व।

अथ॑ ते ब्रह्म॒ण्वान् य॒ज्ञो भ॑विष्यति।

अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।

स ए॒तम॒ग्नये॒ कामा॑य

पु॒रो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।

ब्रह्म॑णे च॒रुम्।

अनु॑मत्यै च॒रुम्।
ततो॒ वै तस्य॑ ब्रह्म॒ण्वान् य॒ज्ञो॑ऽभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
ब्र॒ह्म॒ण्वान् ह॒ वा अ॑स्य य॒ज्ञो भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ ब्रह्म॑णे॒ स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚
स्वि॒ष्ट॒कृते॒ स्वाहेति॑॥ **5**॥

तं य॒ज्ञो᳚ऽब्रवीत्।
प्रजा॑पते य॒ज्ञेन॒ वै श्रा᳚म्यसि।
अ॒हमु॒ वै य॒ज्ञो᳚ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यो य॒ज्ञो भ॑वष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य
पु॒रो॒डाश॑म॒ष्टाक॑पालं॒ निर॑वपत्।

य॒ज्ञायं च॒रुम्।
अनुंमत्यै च॒रुम्।
ततो॒ वै तस्यं स॒त्यो य॒ज्ञोंऽभवत्।
अनुं स्व॒र्गं लो॒कमंविन्दत्।
स॒त्यो ह॒ वा अंस्य य॒ज्ञो भंवति।
अनुं स्व॒र्गं लो॒कं विंन्दति।
य ए॒तेनं ह॒विषा॒ यजंते।
य उं चैनदे॒वं वेदं।
सोऽत्रं जुहोति।
अ॒ग्नये॒ कामांय॒ स्वाहां य॒ज्ञाय॒ स्वाहां।
अनुंमत्यै॒ स्वाहां प्र॒जापंतये॒ स्वाहां।
स्व॒र्गायं लो॒काय॒ स्वाहा॒ऽग्नयें
स्वि॒ष्ट॒कृते॒ स्वाहेतिं॥ 6॥

तमापोंऽब्रुवन्।
प्र॒जांपते॒ऽप्सु वै सर्वे॒ कामांः श्रि॒ताः।
व॒यमु॒ वा आपंः स्मः।
अ॒स्मान्नु यंजस्व।
अथ॒ त्वयि॒ सर्वे॒ कामांः श्रयिष्यन्ते।
अनुं स्व॒र्गं लो॒कं वे॒थ्स्यसीतिं।
स ए॒तम॒ग्नये॒ कामांय

पुरो॒डाशं॑म॒ष्टाक॑पालं॒ निर॑वपत्।
अ॒द्भ्यश्च॒रुम्।
अनु॑मत्यै च॒रुम्।
ततो॒ वै तस्मि॒न्थ्सर्वे॒ कामा॑ अश्रयन्त।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
सर्वे॑ ह॒ वा अ॑स्मि॒न्कामाँ॑ श्रयन्ते।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहा॒ऽद्भ्यः स्वाहा᳚।
अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚
स्वि॒ष्ट॒कृते॒ स्वाहेति॑॥ 7॥

त॒म॒ग्निर्ब॑लि॒मान॑ब्रवीत्।
प्रजा॑पते॒ऽग्नये॒ वै ब॑लि॒मते॒
सर्वा॑णि भू॒तानि॑ ब॒लिग्ं ह॑रन्ति।
अ॒हमु॒ वा अ॒ग्निर्ब॑लि॒मान॑स्मि।
मां नु य॑जस्व।
अथ॑ ते॒ सर्वा॑णि भू॒तानि॑ ब॒लिग्ं ह॑रिष्यन्ति।

sunder kidambi prapatti dot com sunder kidambi

अनु स्वर्गं लोकं वेथ्स्यसीति।
स एतमग्नये कामाय
   पुरोडाशमष्टाकपालं निरवपत्।
अग्नये बलिमते चरुम्।
अनुमत्यै चरुम्।
ततो वै तस्मै सर्वाणि भूतानि बलिमहरन्।
अनु स्वर्गं लोकमविन्दत्।
सर्वाणि ह वा अस्मै भूतानि बलिग्ं हरन्ति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उ चैनदेवं वेद।
सोऽत्र जुहोति।
अग्नये कामाय स्वाहाऽग्नये बलिमते स्वाहा।
अनुमत्यै स्वाहा प्रजापतये स्वाहा।
स्वर्गाय लोकाय स्वाहाऽग्नये
   स्विष्टकृते स्वाहेति॥ **8**॥

तमनुवित्तिरब्रवीत्।
प्रजापते स्वर्गं वै लोकमनु विविथ्ससि।
अहमु वा अनुवित्तिरस्मि।
मां नु यजस्व।

sunder prapatti dot com sunder kidāmbi

अथ॑ ते स॒त्याऽनु॑वित्तिर्भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒त्स्यसीति॑।
स ए॒तम॒ग्नये॒ कामा॑य
   पुरो॒डाशं॑म॒ष्टाक॑पाल॒ं निर॑वपत्।
अनु॑वित्यै च॒रुम्।
अनु॑मत्यै च॒रुम्।
ततो॒ वै तस्यं॑ स॒त्याऽनु॑वित्तिरभवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्या ह॒ वा अ॒स्यानु॑वित्तिर्भवति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ कामा॑य॒ स्वाहाऽनु॑वित्त्यै॒ स्वाहा॓।
अनु॑मत्यै॒ स्वाहा॓ प्रजाप॑तये॒ स्वाहा॓।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये॓
   स्विष्ट॒कृते॒ स्वाहेति॑॥ 9॥

ता वा ए॒ताः स॒प्त स्व॒र्गस्य॑
   लो॒कस्य॒ द्वार॑ः।
दि॒वश्श्ये॑न॒योऽनु॑वित्तयो॒ नाम॑।

आशाँ प्र॒थ॒मागं॒ रं॑क्षति।
कामोँ द्वि॒तीयाँम्।
ब्रह्मं तृ॒तीयाँम्।
य॒ज्ञश्चं॑तु॒र्थीम्।
आपः॑ प॒ञ्च॒मीम्।
अ॒ग्निर्ब॑लि॒मान्थ्ष॒ष्ठीम्।
अनुं॑वित्तिः स॒प्त॒मीम्।
अनुं ह॒ वै स्व॒र्गं लो॒कं विन्दति।
का॒म॒चारोँऽस्य स्व॒र्गे लो॒के भंवति।
य ए॒ताभि॒रिष्टि॑भि॒र्यज॑ते।
य उं चैना ए॒वं वेदं।
तास्वं॒न्वि॒ष्टि।
प॒ष्ठौ॒ही॒व॒रां दं॑द्यात्क॒गं॒सं चं।
स्त्रियैं चाभा॒रगं॒ समृं॑द्ध्यै॥ **10**॥ ॥ **2**॥

तपं॑सा दे॒वा दे॒वता॒मग्रं आयन्।
तप॒सर्षं॑यः॒ स्वं॑रन्वं॑विन्दन्।
तपं॑सा स॒पत्ना॒न्प्रणुं॑दा॒मारां॑तीः।
येने॒दं विश्वं॒ परिं॑भूतं॒ यदस्तिं।
प्र॒थ॒म॒जं दे॒वगं॒ ह॒विषां विधेम।
स्व॒य॒म्भु ब्रह्मं पर॒मं तपो॒ यत्।

स ए॒व पु॒त्रः स पि॒ता स मा॒ता।
तपो॑ ह य॒क्षं प्र॑थ॒मग्ं सं ब॑भूव।
श्र॒द्धया॑ दे॒वो दे॒वत्वम॑श्नुते।
श्र॒द्धा प्र॑ति॒ष्ठा लो॒कस्य॑ दे॒वी॥ **11**॥

सा नो॑ जुषा॒णोप॑ य॒ज्ञमागा॑त्।
काम॑वथ्सा॒ऽमृतं॒ दुहा॑ना।
श्र॒द्धा दे॒वी प्र॑थम॒जा ऋ॒तस्य॑।
विश्व॑स्य भ॒र्त्री जग॑तः प्रति॒ष्ठा।
ताग्ं श्र॒द्धाग्ं ह॒विषा॑ यजामहे।
सा नो॑ लो॒कम॒मृतं॑ दधातु।
ईशा॑ना दे॒वी भुव॑न॒स्याधि॑पत्नी।
आगा॑थ्स॒त्यग्ं ह॒विरि॒दं जु॑षा॒णम्।
यस्मा॑द्दे॒वा ज॑ज्ञि॒रे भुव॑नं च॒ विश्वे॑।
तस्मै॑ विधेम ह॒विषा॑ घृ॒तेन॑॥ **12**॥

यथा॑ दे॒वैः स॑ध॒माद॑ मदेम।
यस्य॑ प्रति॒ष्ठोर्व॑न्तरि॑क्षम्।
यस्मा॑द्दे॒वा ज॑ज्ञि॒रे भुव॑नं च॒ सर्वे॑।
तथ्स॒त्यम॒र्च॒दुप॑ य॒ज्ञं न॒ आगा॑त्।
ब्रह्माहु॑ती॒रुप॒मोद॑मानम्।
मन॑सो॒ वशे॒ सर्व॑मि॒दं ब॑भूव।

नान्यस्य मनो वशमन्विंयाय।
भीष्मो हि देवः सहंसः सहींयान्।
स नों जुषाण उपं यज्ञमागांत्।
आकूंतीनामधिंपतिं चेतंसां च॥ **13**॥

सङ्कल्पजूंतिं देवं विंपश्चिम्।
मनो राजांनमिह वर्धयंन्तः।
उपहवेंऽस्य सुमतौ स्यांम।
चरंणं पवित्रं वितंतं पुराणम्।
येनं पूतस्तरंति दुष्कृतानिं।
तेनं पवित्रेंण शुद्धेनं पूताः।
अतिं पाप्मानमरांतिं तरेम।
लोकस्य द्वारंमर्चिमत्पवित्रम्।
ज्योतिंष्मद्भ्राजंमानं महंस्वत्।
अमृतंस्य धारां बहुधा दोहंमानम्।
चरंणं नो लोके सुधिंतां दधातु।
अग्निर्मूर्धा भुवंः।
अनुं नोऽद्यानुंमतिरन्विदंनुमते त्वम्।
हव्यवाहग्ग् स्विंष्टम्॥ **14**॥

देवी घृतेन चेतंसां च दोहंमानं चत्वारिं च॥ **3**॥



sunder kidambi prapatti dot com sunder kidambi

दे॒वेभ्यो॒ वै स्व॒र्गो लो॒कस्ति॒रोऽभवत्।
ते प्र॒जाप॑तिमब्रुवन्।
प्रजा॑पते स्व॒र्गो वै नो॑ लो॒कस्ति॒रो॑ऽभूत्।
तमन्वि॒च्छेति॑।
तं य॑ज्ञक्र॒तुभि॒रन्वै॑च्छत्।
तं य॑ज्ञक्र॒तुभि॒र्नान्व॑विन्दत्।
तमिष्टि॑भि॒रन्वै॑च्छत्।
तमिष्टि॑भि॒रन्व॑विन्दत्।
तदिष्टी॑नामिष्टि॒त्वम्।
एष्ट॑यो ह॒ वै नाम॑।
ता इष्ट॑य॒ इत्याच॑क्षते प॒रोक्षे॑ण।
प॒रोक्ष॑प्रिया इव॒ हि दे॒वाः॥ **15**॥

तं तपो॑ऽब्रवीत्।
प्रजा॑पते॒ तप॑सा॒ वै श्रा॑म्यसि।
अ॒हमु॒ वै तपो॑ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यं तपो॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।
स ए॒तमा॑ग्ने॒यम॒ष्टाक॑पालं॒ निर॑वपत्।
तप॑से च॒रुम्।

अनुमत्यै चरुम्।
ततो वै तस्यं सत्यं तपोऽभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्यगं ह वा अस्य तपो भवति।
अनु स्वर्गं लोकं विन्दति।
य एतेन हविषा यजते।
य उं चैनदेवं वेदं।
सोऽत्रं जुहोति।
अग्नये स्वाहा तपसे स्वाहाँ।
अनुमत्यै स्वाहाँ प्रजापतये स्वाहाँ।
स्वर्गाय लोकाय स्वाहाऽग्नयेँ
स्विष्टकृते स्वाहेति॥ **16**॥

तग्ग् श्रद्धाऽब्रवीत्।
प्रजापते श्रद्धया वै श्राँम्यसि।
अहमु वै श्रद्धाऽस्मि।
मां नु यजस्व।
अथ ते सत्या श्रद्धा भविष्यति।
अनु स्वर्गं लोकं वेथ्स्यसीति।
स एतमाँग्नेयमष्टाकपालं निरवपत्।
श्रद्धायै चरुम्।

अनु॑मत्यै च॒रुम्।

ततो॒ वै तस्यै॑ स॒त्या श्र॒द्धाऽभ॑वत्।

अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।

स॒त्या ह॒ वा अ॑स्य श्र॒द्धा भ॑वति।

अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।

य ए॒तेन॑ ह॒विषा॒ यज॑ते।

य उ॑ चैनदे॒वं वेद॑।

सोऽत्र॑ जुहोति।

अ॒ग्नये॒ स्वाहा᳚ श्र॒द्धायै॒ स्वाहा᳚।

अनु॑मत्यै॒ स्वाहा᳚ प्र॒जाप॑तये॒ स्वाहा᳚।

स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये᳚

स्वि॒ष्ट॒कृते॒ स्वाहेति॑॥ **17**॥

तग्ं स॒त्यम॑ब्रवीत्।

प्रजा॑पते स॒त्येन॒ वै श्रा᳚म्यसि।

अ॒हमु॒ वै स॒त्यम॑स्मि।

मां नु य॑जस्व।

अथ॑ ते स॒त्यग्ं स॒त्यं भ॑विष्यति।

अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।

स ए॒तमा᳚ग्ने॒यम॒ष्टाक॑पालं॒ निर॑वपत्।

स॒त्याय॑ च॒रुम्।

अनु॑मत्यै च॒रुम्।
ततो॒ वै तस्य॑ स॒त्यगं स॒त्यम॑भवत्।
अनु॑ स्व॒र्गं लो॒कम॑विन्दत्।
स॒त्यगं ह॒ वा अ॑स्य स॒त्यं भ॑वति।
अनु॑ स्व॒र्गं लो॒कं वि॑न्दति।
य ए॒तेन॑ ह॒विषा॒ यज॑ते।
य उ॑ चैनदे॒वं वेद॑।
सोऽत्र॑ जुहोति।
अ॒ग्नये॒ स्वाहा॑ स॒त्याय॒ स्वाहा॑।
अनु॑मत्यै॒ स्वाहा॑ प्र॒जाप॑तये॒ स्वाहा॑।
स्व॒र्गाय॑ लो॒काय॒ स्वाहा॒ऽग्नये॑
स्विष्ट॒कृते॒ स्वाहेति॑॥ **18**॥

तं मनो॑ऽब्रवीत्।
प्रजा॑पते॒ मन॑सा॒ वै श्रा॑म्यसि।
अ॒हमु॒ वै मनो॑ऽस्मि।
मां नु य॑जस्व।
अथ॑ ते स॒त्यं मनो॑ भविष्यति।
अनु॑ स्व॒र्गं लो॒कं वे॒थ्स्यसीति॑।
स ए॒तमा॑ग्ने॒यम॒ष्टाक॑पाल॒ं निर॑वपत्।
मन॑से च॒रुम्।

अनुमत्यै चरुम्।
ततो वै तस्यं सत्यं मनोऽभवत्।
अनु स्वर्गं लोकमविन्दत्।
सत्यगं ह वा अंस्य मनो भवति।
अनु स्वर्गं लोकं विंन्दति।
य एतेन हविषा यजंते।
य उं चैनदेवं वेदं।
सोऽत्रं जुहोति।
अग्नये स्वाहा मनंसे स्वाहाँ।
अनुमत्यै स्वाहाँ प्रजापंतये स्वाहाँ।
स्वर्गाय लोकाय स्वाहाऽग्नयेँ
स्विष्टकृते स्वाहेति॥ **19**॥

तं चरंणमब्रवीत्।
प्रजापते चरंणेन वै श्रॉम्यसि।
अहमु वै चरंणमस्मि।
मां नु यंजस्व।
अथं ते सत्यं चरंणं भविष्यति।
अनु स्वर्गं लोकं वेथ्स्यसीति।
स एतमाँग्नेयमष्टाकंपालं निरंवपत्।
चरंणाय चरुम्।

prapatti dot com
sunder kidambi
sunder kidambi

अनुमत्यै च॒रुम्।
ततो॒ वै तस्यं स॒त्यं चरणमभवत्।
अनु स्व॒र्गं लो॒कमविन्दत्।
स॒त्यग् ह॒ वा अस्य॒ चरणं भवति।
अनु स्व॒र्गं लो॒कं विन्दति।
य ए॒तेन ह॒विषा॒ यजते।
य उं चैनदे॒वं वेदं।
सोऽत्रं जुहोति।
अ॒ग्नये॒ स्वाहा॒ चरणाय॒ स्वाहाँ।
अनुमत्ये॒ स्वाहाँ प्र॒जापतये॒ स्वाहाँ।
स्व॒र्गायं लो॒काय॒ स्वाहा॒ऽग्नयैं
स्वि॒ष्ट॒कृते॒ स्वाहेति॥ **20**॥

ता वा ए॒ताः पञ्चं स्व॒र्गस्यं लो॒कस्य॒ द्वारः।
अपाघा॒ अनुवित्तयो॒ नाम।
तपः प्र॒थ॒माग् रक्षति।
श्र॒द्धा द्वि॒तीयाँम्।
स॒त्यं तृ॒तीयाँम्।
मनश्चतु॒र्थीम्।
चरणं पञ्च॒मीम्।
अनु ह॒ वै स्व॒र्गं लो॒कं विन्दति।

का॒म॒चारो॑ऽस्य स्व॒र्गे लो॒के भ॑वति।
य ए॒ताभि॒रिष्टि॑भि॒र्यज॑ते।
य उ॑ चैना ए॒वं वेद॑।
तास्व॑न्वि॒ष्टि।
पृ॒ष्ठौ॒ही॒व॒रं द॑द्यात्कु॒ग्‍ं॒सं च॑।
स्त्रियै॑ चाभा॒रग्ं सम॑र्द्ध्यै॥ **21** ॥ ॥ **4** ॥

आशाऽनु॑वित्तिश्श्र॒द्धा स॒त्या ह॑।
कामो॑ य॒ज्ञस्स॒त्यो ह॑।
अ॒न्यत्र॑ स॒त्यग्ं ह॑॥

ब्रह्म॒ वै चतु॑र्‌होतारः।
चतु॑र्‌होतृ॒भ्योऽधि॑ य॒ज्ञो निर्मि॑तः।
नैनग्ं॑ श॒प्तम्।
नाभिच॑रि॒तमाग॑च्छति।
य ए॒वं वेद॑।
यो ह॒ वै चतु॑र्‌होतृणां चतु॒र्‌होतृ॒त्वं वेद॑।
अथो॒ पञ्च॑होतृत्वम्।
सर्वा॒ हास्मै॒ दिश॑ः कल्पन्ते।
वा॒चस्पति॒र्॒होता॒ दश॑होतृणाम्।
पृ॒थि॒वी होता॒ चतु॑र्‌होतृणाम्॥ **22** ॥



sunder kidambi prapatti dot com sunder kidambi

अ॒ग्निर्हो॑ता॒ पञ्च॑होतॄणाम्।
वाग्घोता॒ षड्ढो॑तॄणाम्।
म॒हाह॑वि॒र्॒होता॑ स॒प्तहो॑तॄणाम्।
ए॒तद्वै चतु॑र्होतॄणां चतुर्होतृ॒त्वम्।
अथो॒ पञ्च॑होतृत्वम्।
सर्वा॒ हास्मै॒ दिश॑ः कल्पन्ते।
य ए॒वं वेद॑।
ए॒षा वै स॑र्ववि॒द्या।
ए॒तद्भे॑ष॒जम्।
ए॒षा प॒ङ्क्तिः स्व॒र्गस्य॑
लो॒कस्या॑ञ्ज॒साय॑निः स्रुतिः॥ **23**॥

ए॒तान् योऽध्यैत्यच्छ॑दिर्द॒र्॒शे याव॑त्त॒रस॑म्।
स्व॑रेति।
अ॒न॒प॒ब्र॒वः सर्व॒मायु॑रेति।
वि॒न्दते॑ प्र॒जाम्।
रा॒यस्पोष॑ं गौप॒त्यम्।
ब्र॒ह्म॒व॒र्च॒सी भ॑वति।
ए॒तान् योऽध्यैति॑।
स्पृ॒णोत्या॒त्मान॑म्।

प्र॒जां पि॒तॄन्।
ए॒तान् वा अ॑रु॒ण औ॑पवे॒शिर्वि॒दाञ्च॑कार॥ **24**॥

ए॒तैर॑धिवा॒दमपा॑जयत्।
अथो॒ विश्वं॑ पा॒प्मान॑म्।
स्व॑र्ययौ।
ए॒तान् योऽध्यैति॑।
अ॒धि॒वा॒दं ज॑यति।
अथो॒ विश्वं॑ पा॒प्मान॑म्।
स्व॑रेति।
ए॒तैर॒ग्निं चि॑न्वीत स्व॒र्गका॑मः।
ए॒तैरायु॑ष्कामः।
प्र॒जा प॒शुका॑मो वा॥ **25**॥

पु॒रस्ता॒द्दश॑होता॒रमुद॑ञ्च॒मुप॑दधाति यावत्प॒दम्।
हृद॑यं॒ यजु॑षी॒ पत्न्यौ॑ च।
द॒क्षि॒ण॒तः प्राञ्चं॒ चतु॑र्होतारम्।
प॒श्चादुद॑ञ्चं॒ पञ्च॑होतारम्।
उ॒त्त॒र॒तः प्रा॒ञ्च॒ग्ं षड्ढो॑तारम्।
उ॒परि॑ष्टा॒त्प्राञ्च॑ग्ं स॒प्तहो॑तारम्।
हृद॑यं॒ यजू॒ग्ंषि॒ पत्न्य॑श्च।
य॒था॒ऽव॒का॒शं ग्रहा॑न्।

sunder kidāmbi
prapatti dot com
sunder kidāmbi

यथाऽवकाशं प्रतिग्रहान्लोकं पृणाश्नं।
सर्वा हास्यैता देवताः प्रीता
अभीष्टा भवन्ति॥ 26॥

सदेवमग्निं चिनुते।
रथसम्मितश्चेतव्यः।
वज्रो वै रथः।
वज्रेणैव पाप्मानं भ्रातृव्यग्ग् स्तृणुते।
पक्षः सम्मितश्चेतव्यः।
एतावान् वै रथः।
यावत्पक्षः।
रथसम्मितमेव चिनुते।
इममेव लोकं पशुबन्धेनाभिजयति।
अथो अग्निष्टोमेन॥ 27॥

अन्तरिक्षमुक्थ्येन।
स्वरतिरात्रेण।
सर्वान्लोकानहीनेन।
अथो सत्रेण।
वरो दक्षिणा।
वरेणैव वरग्ग् स्पृणोति।
आत्मा हि वरः।

एक॑विग्ंशति॒र्दक्षि॑णा ददाति।
ए॒क॒वि॒ग्ं॒शो वा इ॒तः स्व॒र्गो लो॒कः।
प्र स्व॒र्गं लो॒कमा᳚प्नोति॥ **28**॥

अ॒सावा॑दि॒त्य ए॑कवि॒ग्ं॒शः।
अ॒मु॒मे॒वादि॒त्यमा᳚प्नोति।
श॒तं द॑दाति।
श॒तायु॒ः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
स॒हस्र॑ं ददाति।
स॒हस्र॑सम्मितः स्व॒र्गो लो॒कः।
स्व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै।
अ॒न्वि॒ष्ट॒कं दक्षि॑णा ददाति।
सर्वा॑णि॒ वया॒ग्ं॑सि॥ **29**॥

स॒र्वस्याप्त्यै᳚।
स॒र्वस्याव॑रुद्ध्यै।
यदि॒ न वि॒न्देत॑।
म॒न्थाने॑ताव॒तो द॑द्यादोद॒नान् वा᳚।
अ॒श्नु॒ते तं काम᳚म्।
यस्मै॒ कामा॑याग्नि॒श्चीय॒ते᳚।
प॒ष्ठौ॒हीं त्व॒न्तर्व॑तीं दद्यात्।

सा हि सर्वाणि वयाग्ंसि।
सर्वस्याप्त्यैँ।
सर्वस्यावंरुद्ध्यै॥ **30**॥

हिरंण्यं ददाति।
हिरंण्यज्योतिरेव स्वर्गं लोकमेंति।
वासों ददाति।
तेनायुः प्रतिंरते।
वेदितृतीये यंजेत।
त्रिषंत्या हि देवाः।
स संत्यमग्निं चिंनुते।
तदेतत्पंशुबन्धे ब्राह्मणं ब्रूयात्।
नेतंरेषु यज्ञेषुं।
यो ह वै चतुंर्होतृननुसवनं
  तंर्पयितव्यान् वेदं॥ **31**॥

तृप्यंति प्रजयां पशुभिंः।
उपैंनग्ं सोमपीथो नंमति।
एते वै चतुंर्होतारोऽनुसवनं तंर्पयितव्याः।
ये ब्रांह्मणा बंहुविदंः।
तेभ्यो यद्दक्षिंणा न नयेंत्।
दुरिंष्टग्ग् स्यात्।

अ॒ग्निम॑स्य वृञ्जीरन्।
तेभ्यो॑ यथाश्र॒द्धं द॑द्यात्।
स्वि॑ष्टमे॒वैतत्क्रि॑यते।
नास्या॒ग्निं वृ॑ञ्जते॥ **32**॥

हि॒र॒ण्ये॒ष्ट॒को भ॑वति।
याव॑दु॒त्तमम॑ङ्गुलिका॒ण्डं य॑ज्ञप॒रुषा॒ सम्मि॑तम्।
तेजो॒ हिर॑ण्यम्।
यदि॒ हिर॑ण्यं॒ न वि॒न्देत्।
शर्क॑रा अ॒क्ता उप॑दध्यात्।
तेजो॑ घृ॒तम्।
सते॑जसमे॒वाग्निं चि॑नुते।
अ॒ग्निं चि॒त्वा सौ᳚त्राम॒ण्या
य॑जेत मैत्रावरु॒ण्या वा᳚।
वी॒र्ये॑ण॒ वा ए॒ष व्यृ॑द्ध्यते।
यो᳚ऽग्निं चि॑नु॒ते॥ **33**॥

याव॑दे॒व वी॒र्य᳚म्।
तद॑स्मिन्दधाति।
ब्रह्म॑णः॒ सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
ए॒तासा॑मे॒व दे॒वता॑ना॒ग्ं॒ सायु॑ज्यम्।
सा॒र्ष्टि॒ताग्ं॑ समानलो॒कता॑माप्नोति।

य ए॒तम॒ग्निं चिं॑नु॒ते।
य उं॑ चैनमे॒वं वेदं॑।
ए॒तदे॒व सां॑वि॒त्रे ब्राह्मं॑णम्।
अथो॒ नाचिके॒ते॥ 34॥

होता॒ चतुं॑र्‌होतॄणाग्‌ स्तु॒तिश्चं॑कार वा भवन्त्यग्निष्टो॒मेनां॒ऽऽप्नोति॒ वयाग्ं॑सि॒ वयाग्ं॑सि॒ सर्व॒स्याऽऽप्त्यै॒ सर्व॒स्याऽवं॑रुद्ध्यै॒ वेदं॑ वृञ्जते चिनु॒ते नवं॑ च॥ 5॥

यच्चा॒मृतं॒ यच्च॒ मर्त्यं॑म्।
यच्च॒ प्राणिं॑ति॒ यच्च॒ न।
सर्वा॒स्ता इष्टं॑काः कृ॒त्वा।
उपं॑ काम॒दुघां॑ दधे।
तेनर्‌षिं॑णा॒ तेन॒ ब्रह्मं॑णा।
तया॑ दे॒वतं॑याऽङ्गिर॒स्वद्ध्रु॒वा सीं॑द।
सर्वाः॒ स्त्रिय॒ः सर्वा॒न्पु॒ग्ं॒सः।
सर्वं॒ न स्त्रीपुमं च॒ यत्।
सर्वा॒स्ताः।
यावं॑न्तः पा॒ग्ं॒सवो॒ भूमेः॑॥ 35॥

सङ्ख्यां॑ता देवमा॒यया॑।
सर्वा॒स्ताः।
यावं॑न्त॒ ऊषाः॑ पशू॒नाम्।
पृथि॒व्यां॑ पुष्टिं॑र्‌हि॒ताः।

सर्वा॒स्ताः।
याव॑ती॒ः सिक॑ता॒ः सर्वाः᳚।
अ॒फ्स्वं॑न्तश्च॒ याः श्रि॒ताः।
सर्वा॒स्ताः।
याव॑ती॒ः शर्क॑रा॒ धृत्यै᳚।
अ॒स्यां पृ॑थि॒व्यामधि॑॥ **36**॥

सर्वा॒स्ताः।
याव॒न्तोऽश्मा॑नो॒ऽस्यां पृ॑थि॒व्याम्।
प्र॒ति॒ष्ठासु॒ प्रति॑ष्ठिताः।
सर्वा॒स्ताः।
याव॑तीर्वी॒रुध॒ः सर्वाः᳚।
विष्ठि॑ताः पृथि॒वीमनु॑।
सर्वा॒स्ताः।
याव॑ती॒रोष॑धी॒ः सर्वाः᳚।
विष्ठि॑ताः पृथि॒वीमनु॑।
सर्वा॒स्ताः॥ **37**॥

याव॑न्तो॒ वन॒स्पत॑यः।
अ॒स्यां पृ॑थि॒व्यामधि॑।
सर्वा॒स्ताः।
याव॑न्तो ग्रा॒म्याः प॒शव॒ः सर्वे᳚।

आ॒र॒ण्याश्च॒ ये।
सर्वा॒स्ताः।
ये द्विपाद॒श्चतु॑ष्पादः।
अ॒पाद॑ उदरस॒र्पिण॑ः।
सर्वा॒स्ताः।
याव॒दाञ्जं॑नमु॒च्यते॑॥ 38॥

दे॒व॒त्रा यच्च॑ मानु॒षम्।
सर्वा॒स्ताः।
याव॑त्कृ॒ष्णाय॑स॒ग्ं॒ सर्व॒᳚म्।
दे॒व॒त्रा यच्च॑ मानु॒षम्।
सर्वा॒स्ताः।
याव॑ल्लो॒हाय॑स॒ग्ं॒ सर्व॒᳚म्।
दे॒व॒त्रा यच्च॑ मानु॒षम्।
सर्वा॒स्ताः।
सर्व॒ग्ं॒ सीस॒ग्ं॒ सर्व॒॑ त्रपु॑।
दे॒व॒त्रा यच्च॑ मानु॒षम्॥ 39॥

सर्वा॒स्ताः।
सर्व॒ग्ं॒ हिर॑ण्यग्ं रज॒तम्।
दे॒व॒त्रा यच्च॑ मानु॒षम्।
सर्वा॒स्ताः।

सर्व॒गं॒ सु॒वर्ण॒गं॒ हरि॑तम्।
दे॒व॒त्रा यच्च॑ मानु॒षम्।
सर्वा॒स्ता इष्ट॑काः कृ॒त्वा।
उप॑ काम॒दुघा॑ दधे।
तेन॒र्षिणा॒ तेन॒ ब्रह्म॑णा।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **40**॥

भू॒मेर॒धि॒ विष्ठि॑ताः पृथि॒वीमनु॒ सर्वा॒स्ता उ॒च्यते॑ मानु॒षगं॒ सी॑द॥ **6**॥

यच्च॒ स्त्रिय॑ः पा॒गं॒सव॒ ऊषा॒स्सिक॑ता॒श्शर्क॑रा॒ अश्मा॑नो वी॒रुध॒ ओष॑धी॒र्वन॒स्पत॑यो ग्रा॒म्या ये द्विपादो॒ याव॒दाञ्ज॑न॒ं याव॑त्कृ॒ष्णाऽय॑सगं॒ लो॒हाऽय॑स॒गं॒ सीस॒गं॒ हिर॑ण्य॒गं॒ सु॒वर्ण॒गं॒ हरि॑तम॒ष्टाद॑श॥

सर्वा॒ दिशो॑ दि॒क्षु।
यच्चा॒न्तर्भू॒तं प्रति॑ष्ठितम्।
सर्वा॒स्ता इष्ट॑काः कृ॒त्वा।
उप॑ काम॒दुघा॑ दधे।
तेन॒र्षिणा॒ तेन॒ ब्रह्म॑णा।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
अ॒न्तरि॑क्षं च॒ केव॑लम्।
यच्चा॒स्मिन्न॒न्त॒राहि॑तम्।
सर्वा॒स्ताः।
आ॒न्त॒रि॒क्ष्य॑श्च॒ याः प्र॒जाः॥ **41**॥

गन्धर्वाप्सरसंश्च ये।
सर्वास्ताः।
सर्वानुदारान्थ्सलिलान्।
अन्तरिंक्षे प्रतिंष्ठितान्।
सर्वास्ताः।
सर्वानुदारान्थ्संलिलान्।
स्थावराः प्रोष्याँश्च ये।
सर्वास्ताः।
सर्वां धुनिगं सर्वान्थ्वगंसान्।
हिमो यच्चं शीयतें॥ **42**॥

सर्वास्ताः।
सर्वान्मरींचीन् वितंतान्।
नीहारो यच्चं शीयतें।
सर्वास्ताः।
सर्वा विद्युतः सर्वान्थ्स्तनयित्नून्।
ह्रादुनीर्यच्चं शीयतें।
सर्वास्ताः।
सर्वाः स्रवंन्तीः सरितंः।
सर्वमप्सुचरं च यत्।
सर्वास्ताः॥ **43**॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi

याश्च॒ कूप्या॒ याश्च॑ ना॒द्याः᳚ समु॒द्रियाः᳚।
याश्च॑ वैश॒न्तीरु॒त प्रा॑स॒चीर्याः।
सर्वा॒स्ताः।
ये चो॒त्तिष्ठ॑न्ति जी॒मूताः᳚।
याश्च॒ वर्ष॑न्ति वृ॒ष्टयः॑।
सर्वा॒स्ताः।
तप॒स्तेज॑ आका॒शम्।
यच्चा॑का॒शे प्रति॑ष्ठितम्।
सर्वा॒स्ताः।
वा॒युं वयाग्ं॑सि॒ सर्वा॑णि॥ **44**॥

अ॒न्त॒रि॒क्ष॒च॒रं॑ च॒ यत्।
सर्वा॒स्ताः।
अ॒ग्निग्ं सूर्य॑ं च॒न्द्रम्।
मि॒त्रं वरु॑णं॒ भग᳚म्।
सर्वा॒स्ताः।
स॒त्यग्ग् श्र॒द्धां तपो॒ दम᳚म्।
नाम॑ रू॒पं च॑ भू॒ताना᳚म्।
सर्वा॒स्ता इष्ट॑काः कृ॒त्वा।
उप॑ काम॒दुघा॑ दधे।

तेनर्‌षिंणा तेन ब्रह्मंणा।
तयां देवतंयाऽङ्गिरस्वद्ध्रुवा सींद॥ **45**॥

प्रजा हिमो यच्चं शीयते सर्वास्तास्सर्वाणि ब्रह्मणैकं च॥ **7**॥

दिशोऽन्तरिंक्षमान्तरिक्ष्यं उदारानुंदारान्धुनिं मरींचीन् विद्युतस्स्रवंन्तीर्याश्च
ये च तपों वायुमग्निग् सत्यं पञ्चंदश॥

सर्वान्दिवग् सर्वान्देवान्दिवि।
यच्चान्तर्भूतं प्रतिंष्ठितम्।
सर्वास्ता इष्टंकाः कृत्वा।
उपं कामदुघां दधे।
तेनर्‌षिंणा तेन ब्रह्मंणा।
तयां देवतंयाऽङ्गिरस्वद्ध्रुवा सींद।
यावंतीस्तारंकाः सर्वाः।
वितंता रोचने दिवि।
सर्वास्ताः।
ऋचो यजूग्ंषि सामांनि॥ **46**॥

अथर्वाङ्गिरसंश्च ये।
सर्वास्ताः।
इतिहासपुराणं चं।
सर्पदेवजनाश्च ये।
सर्वास्ताः।

ये च लोका ये चालोकाः।
अन्तर्भूतं प्रतिष्ठितम्।
सर्वास्ताः।
यच्च ब्रह्म यच्चाब्रह्म।
अन्तर्ब्रह्मन्प्रतिष्ठितम्॥ **47**॥

सर्वास्ताः।
अहोरात्राणि सर्वाणि।
अर्धमासाग्श्च केवलान्।
सर्वास्ताः।
सर्वानृतून्त्सर्वान्मासान्।
संवत्सरं च केवलम्।
सर्वास्ताः।
सर्वं भूतगं सर्वं भव्यम्।
यच्चातोऽधि भविष्यति।
सर्वास्ता इष्टकाः कृत्वा।
उप कामदुघां दधे।
तेनर्षिणा तेन ब्रह्मणा।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ **48**॥

सामानि ब्रह्मन्प्रतिष्ठितं कृत्वा त्रीणि च॥ **8**॥

दिवं तारका ऋचं इतिहासपुराणं च ये च यच्चाऽहोरात्राण्यृतून्भूतं नव॥



sunder kidāmbi prapatti dot com sunder kidāmbi

ऋ॒चां प्राची॑ मह॒ती दिगु॑च्यते।
दक्षि॑णामाहु॒र्यजु॑षामपा॒राम्।
अथ॑र्वणा॒मङ्गि॑रसां प्र॒तीची᳚।
साम्ना॒मुदी॑ची मह॒ती दिगु॑च्यते।
ऋ॒ग्भिः पू᳚र्वा॒ह्णे दि॒वि दे॒व ई॑यते।
य॒जु॒र्वे॒दे ति॑ष्ठति॒ मध्ये॒ अह्नः॑।
सा॒म॒वे॒देना᳚स्तम॒ये मही॑यते।
वे॒दै॒रशू᳚न्यस्त्रि॒भिरे॑ति॒ सूर्यः॑।
ऋ॒ग्भ्यो जा॒ताग्ं सर्व॒शो मूर्ति॑माहु॒ः।
सर्वा॒ गति॑र्याजु॒षी है॒व शश्व॑त्॥ **49**॥

सर्वं॒ तेज॑ः सामरू॒प्यग्ं ह॑ शश्व॑त्।
सर्वग्ं॑ हे॒दं ब्रह्म॑णा है॒व सृ॒ष्टम्।
ऋ॒ग्भ्यो जा॒तं वैश्यं॒ वर्ण॑माहु॒ः।
य॒जु॒र्वे॒दं क्ष॑त्रि॒यस्या॑हु॒र्योनि᳚म्।
सा॒म॒वे॒दो ब्रा᳚ह्म॒णाना॒ं प्रसू॑तिः।
पूर्वे॒ पूर्वे᳚भ्यो॒ वच॑ ए॒तदू॑चुः।
आ॒द॒र्॒शम॒ग्निं चि॑न्वा॒नाः।
पूर्वे॑ विश्व॒सृजो॒ऽमृता॑ः।
श॒तं व॑र्॒षसह॒स्राणि॑।
दी॒क्षि॒ताः स॒त्रमा॑सत॥ **50**॥



prapatti dot com sunder kidambi

तप॑ आसीद्गृ॒हप॑तिः।
ब्रह्म॑ ब्र॒ह्माऽभ॑वथ्स्व॒यम्।
स॒त्यग्ं ह॒ होतै॑षा॒मासी᳚त्।
यद्वि॑श्व॒सृज॒ आस॑त।
अ॒मृत॑मेभ्य॒ उद॑गायत्।
स॒हस्र॑ं परिवथ्स॒रान्।
भू॒तग्ं ह॑ प्रस्तो॒तैषा॒मासी᳚त्।
भ॒वि॒ष्यत्प्रति॑ चाहरत्।
प्रा॒णो अ॑ध्व॒र्युर॑भवत्।
इ॒दग्ं सर्व॒ग्ं॒ सिषा॑सताम्॥ **51** ॥

अ॒पा॒नो वि॒द्वाना॒वृत॑ः।
प्रति॒ प्राति॑ष्ठदध्व॒रे।
आ॒र्त॒वा उ॑पगा॒तार॑ः।
स॒द॒स्या॑ ऋ॒तवो॑ऽभवन्।
अ॒र्ध॒मा॒साश्च॒ मासा᳚श्च।
च॒म॒सा॒ध्व॒र्य॒वोऽभ॑वन्।
अश॒ग्ं॒सद्ब्रह्म॑ण॒स्तेज॑ः।
अ॒च्छा॒वा॒कोऽभ॑वद्य॒शः।
ऋ॒तमे॑षां प्रशा॒स्ताऽऽसी᳚त्।
यद्वि॑श्व॒सृज॒ आस॑त॥ **52** ॥

ऊर्ग्राजा॑नमुद॑वहत्।
ध्रुवगो॒पः सहो॑ऽभवत्।
ओजो॒ऽभ्य॑ष्टौद्ग्राव्ण॑ः।
यद्विश्वसृज॒ आस॑त।
अप॑चितिः पो॒त्रीया॑मयजत्।
ने॒ष्ट्रीया॑मयज॒त्त्विषि॑ः।
आग्नी॑द्ध्राद्वि॒दुषी॑ स॒त्यम्।
श्र॒द्धा है॒वाय॑जथ्स्व॒यम्।
इरा॒ पत्नी॑ वि॒श्वसृजा॑म्।
आकू॑तिरपिनड्ढ॒विः ॥ **53** ॥

इ॒ध्मग्ं ह॒ क्षुच्चै॑भ्य उ॒ग्रे।
तृष्णा चाव॑हतामु॒भे।
वागे॑षाग्ं सुब्रह्म॒ण्याऽऽसी॑त्।
छ॒न्दो॒यो॒गान् वि॑जान॒ती।
क॒ल्प॒त॒न्त्राणि॑ तन्वा॒नाऽह॑ः।
स॒ग्ग्॒स्थाश्च॑ सर्व॒शः।
अ॒हो॒रा॒त्रे प॑शुपा॒ल्यौ।
मु॒हू॒र्ताः प्रे॒ष्या॑ अभवन्।
मृ॒त्युस्तद॑भवद्धा॒ता।
श॒मि॒तोग्रो वि॒शां पति॑ः ॥ **54** ॥

वि॒श्व॒सृजः॑ प्रथ॒माः स॒त्रमा॑सत।
स॒ह॒स्र॑सम॒ं प्रसु॑तेन॒ यन्तः॑।
ततो॑ ह जज्ञे॒ भुव॑नस्य गो॒पाः।
हि॒र॒ण्मयः॑ श॒कुनि॒र्ब्रह्म॒ नाम॑।
येन॒ सूर्य॒स्तप॑ति॒ तेज॑से॒द्धः।
पि॒ता पु॒त्रेण॑ पि॒तृमान् योनि॑योनौ।
नावे॑दविन्मनुते॒ तं बृ॒हन्तम्॑।
स॒र्वा॒नु॒भुमा॒त्मानग्॑ं संप॒रा॒ये।
ए॒ष नि॒त्यो म॑हि॒मा ब्रा॑ह्म॒णस्य॑।
न कर्म॑णा वर्धते॒ नो कनी॑यान्॥ **55** ॥

तस्यै॒वात्मा प॑द॒वित्तं वि॑दि॒त्वा।
न कर्म॑णा लिप्यते॒ पाप॑केन।
पञ्च॑पञ्चा॒शत॑स्त्रि॒वृतः॑ संव॒थ्स॒राः।
पञ्च॑पञ्चा॒शतः॑ पञ्चद॒शाः।
पञ्च॑पञ्चा॒शतः॑ सप्तद॒शाः।
पञ्च॑पञ्चा॒शत॑ एकवि॒ग्ं॒शाः।
वि॒श्व॒सृजाग्॑ं स॒हस्र॑संवथ्सरम्।
ए॒तेन॒ वै वि॑श्व॒सृज॑ इ॒दं विश्व॑मसृजन्त।
यद्विश्व॑मसृ॑जन्त।
तस्मा॑द्विश्व॒सृजः॑।

विश्वंमेना॒नन॒ु प्रजांयते।
ब्रह्मंण॒ः सायु॒ज्यग्ं सलो॒कतां यन्ति।
ए॒तासां॒मेव दे॒वतांना॒ग्॒ं सायु॒ज्यम्।
सा॒र्ष्टिताग्ं समानलो॒कतां यन्ति।
य ए॒तदु॒प॒यन्तिं।
ये चैंन॒त्प्राहुः।
येभ्यंश्चैन॒त्प्राहुः।
ओम्॥ **56**॥

शश्वंदासत॒ सिषांसता॒मासंत ह॒विष्पति॒ः कनीया॒न्तस्मांद्विश्व॒सृजो॒ऽष्टौ चं॥ **9**॥

तुभ्यं दे॒वेभ्यस्तपंसा दे॒वेभ्यो॒ ब्रह्म वै चतुं॒र्होतारो॒ यज्ञा॒ऽमृत॒ग्॒ं सर्वा॒ दिशो॒ दि॒क्षु सर्वा॒न्दिवंमृचां प्राची॒ नवं॥ **9**॥

तुभ्यं तपंसा॒ ता वा ए॒ताः पञ्च॒ हिरंण्यं ददाति॒ सर्वा॒ दिश॒स्तपं आसीद्गृ॒हपंति॒ष्षड्वंञ्चा॒शत्॥ **56**॥

तुभ्य॒मोम्॥

॥ हरिः ओ(३)म्॥

**॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके द्वादशः प्रश्नः समाप्तः॥**



sunder kidambi prapatti dot com sunder kidambi